# ॥ वाल्मीकि रामायण॥

## ३ अरण्यकाण्ड

### अध्याय २१

एवमाधर्षितः शूरः शूर्पणख्या खरस्तदा ।
उवाच रक्षसां मध्ये खरः खरतरं वचः ॥१॥

तवापमानप्रभवः क्रोधोऽयमतुलो मम ।
न शक्यते धारयितुं लवणाम्भ इवोत्थितम् ॥२॥

न रामं गणये वीर्यान्मानुषं क्षीणजीवितम् ।
आत्मा दुश्चरितैः प्राणान्हतो योऽद्य विमोक्ष्यति ॥३॥

बाष्पः संह्रियतामेष सम्भ्रमश्च विमुच्यताम् ।
अहं रामः सह भ्रात्रा नयामि यमसादनम् ॥४॥

परश्वधहतस्याद्य मन्दप्राणस्य भूतले ।
रामस्य रुधिरं रक्तमुष्णं पास्यसि राक्षसि ॥५॥

सा प्रहृष्टवा वचः श्रुत्वा खरस्य वदनाच्च्युतम् ।
प्रशशंस पुनर्मौर्ख्याद्भ्रातरं रक्षसां वरम् ॥६॥

तया परुषितः पूर्वं पुनरेव प्रशंसितः ।
अब्रवीद्दूषणं नाम खरः सेनापतिं तदा ॥७॥

चतुर्दश सहस्राणि मम चित्तानुवर्तिनाम् ।
रक्षसीं भीमवेगानां समरेष्वनिवर्तिनाम् ॥८॥

नीलजीमूतवर्णानां घोराणां क्रूरकर्मणाम् ।
लोकसिंहाविहाराणां बलिनामुग्रतेजसाम् ॥९॥

तेषां शार्दूलदर्पाणां महास्यानाअ म् महौजसाम् ।
सर्वोद्योगमुदीर्णानां रक्षसां सौम्य कारय ॥१०॥

उपस्थापय मे क्षिप्रं रथं सौम्य धनूंषि च ।
शरांश्च चित्रान्खड्गांश्च शक्तीश्च विविधाः शिताः ॥११॥

अग्रे निर्यातुमिच्छामि पौलस्त्यानां महात्मनाम् ।
वधार्थं दुर्विनीतस्य रामस्य रणकोविदः ॥१२॥

इति तस्य ब्रुवाणस्य सूर्यवर्णं महारथम् ।
सदश्वैः शबलैर्युक्तमाचचक्षेऽथ दूषणः ॥१३॥

तं मेरुशिखराकारं तप्तकाञ्चनभूषणम् ।
हेमचक्रमसम्बाधं वैदूर्यमय कूबरम् ॥१४॥

मत्स्यैः पुष्पैर्द्रुमैः शैलैश्चन्द्रसूर्यैश्च काञ्चनैः ।
माङ्गल्यैः पक्षिसङ्घैश्च ताराभिश्च समावृतम् ॥१५॥

ध्वजनिस्त्रिंशसम्पन्नं किङ्किणीकविभूषितम् ।
सदश्वयुक्तं सोऽमर्षादारुरोह रथं खरः ॥१६॥

निशाम्य तं रथगतं राअक् षसा भीमविक्रमा ।
तस्थुः सम्परिवार्यैनं दूषणं च महाबलम् ॥१७॥

खरस्तु तान्महेष्वासान्घोरचर्मायुधध्वजान् ।
निर्यातेत्यब्रवीद्दृष्ट्वा रथस्थः सर्वराक्षसान् ॥१८॥

ततस्तद्राक्षसं सैन्यं घोरचर्मायुधध्वजम् ।
निर्जगाम जनस्थानान्महानादं महाजवम् ॥१९॥

मुद्गरैः पट्टिशैः शूलैः सुतीक्ष्णैश्च परश्वधैः ।
खड्गैश्चक्रैश्च हस्तस्थैर्भ्राजमानैश्च तोमरैः ॥२०॥

शक्तिभिः पतिघैर्घोरैरतिमात्रैश्च कार्मुकैः ।
गदासिमुसलैर्वज्रैर्गृहीतैर्भीमदर्शनैः ॥२१॥

राक्षसानां सुघोराणां सहस्राणि चतुर्दश ।
निर्यातानि जनस्थानात्खरचित्तानुवर्तिनाम् ॥२२॥

तांस्त्वभिद्रवतो दृष्ट्वा राक्षसान्भीमविक्रमान् ।
खरस्यापि रथः किं चिज्जगाम तदनन्तरम् ॥२३॥

ततस्ताञ्शबलानश्वांस्तप्तकाञ्चनभूषितान् ।
खरस्य मतमाज्ञाय सारथिः समचोदयत् ॥२४॥

स चोदितो रथः शीघ्रं खरस्य रिपुघातिनः ।
शब्देनापूरयामास दिशश्च प्रतिशस्तथा ॥२५॥

प्रवृद्धमन्युस्तु खरः खरस्वनो

रिपोर्वधार्थं त्वरितो यथान्तकः ।
अचूचुदत्सारथिमुन्नदन्पुनर्
महाबलो मेघ इवाश्मवर्षवान् ॥ २६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com